नं० ४४२६ — ब
पौर्णमा सोष्ट प्रयोग: (पूर्ण)
पत्राणि २० (विंशतिः)

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ४४२६-घ

पौर्णमासेष्टि प्रयोग: (पूर्ण)

पत्राणि २० (विंशति:)

© Dharmartha Trust J&K. Digitized by eGangotri

गौरोम्ना

रद्रनीपा०

© Dharmartha Trust J&K. Digitized by eGangotri

॥श्रीगणेशाय नमः॥श्रीयज्ञपुरुषाय नमः॥ ॥अथ पौर्णमासेष्टि
प्रयोगः॥आहवनीयदक्षिणाग्निखरयोः पंचभूसंस्कारः
॥ समूह्य॥२॥ उपलिप्य॥३॥ स्फ्येनोल्लिख्य॥४॥ उद्धृत्य॥५॥ अभ्यु
क्ष्य॥ पौर्णमासेनाबादर्शेष्ट्यर्थं गार्हपत्यादाहवनीयमुद्धरामि
इति संकल्प्यः॥आहवनीयोद्धरणं॥गार्हपत्याद्दक्षिणाग्नि
माहरामि इति दक्षिणाग्नेः॥अस्माकं स्वयं यजमान उद्धरणं
कुर्यात् अध्वर्युणां ते अध्वर्युरेवेति पक्षान्तिकारः॥ ततो अभ्यन्वा
धानं॥ ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम॥
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम॥ इत्या
हवनीये समिधमादधाति॥ तूष्णीं द्वितीयामेवमितरयोर
न्योः॥ अध्वर्योः॥ षडासनं॥ ब्रह्मणे यजमानयोर्वेदे॥ प्रणीतापा ॥१॥

© Dharmartha Trust J&K. Digitized by eGangotri

||२|| ब्रह्मन् वरणं || प्रास्तु स्वं ब्रह्माणं तदं प्रास्तु स्वः स्वयमुपवि
श्य || यवां गृहीत्वा ब्रह्मशोदक्षिणं जानु मालभ्य अमुकगोत्र
अमुकशर्मन् पौर्णमासे वा दर्शे वा आवयं यष्टव्यामहे तत्र त्वं पते
भुवनपते महतो भूतस्य पते ब्रह्माणं वा हं त्वा महे इति व
रणं कुर्यात् || उदिते पौर्णमास्यां अनुदिते अमावास्यायां
अहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्भूर्भु
वः स्वर्देव सवितरेतं त्वा वृणते बृहस्पतिं ब्रह्माणं तद
हं मनसे प्रब्रवीमि मनो गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब् ज लेज
गत्यनुष्टुभेनुष्टुप् प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यो
बृहस्पति र्देवानां ब्रह्माहं मनुष्याणां ॐ वाचस्पते यज्ञं गोपा
य ॐ निरस्तः परावसुर्योस्मान्द्वेष्टि यं च वयं द्विष्मस्तेन स

© Dharmartha Trust J&K. Digitized by eGangotri

॰ग्र धृ मुः मा हं प न्त मु नरे लो द वा नं नि धन प ॰गा न म नो
कनन्वा नरा कारि ध्याम ॥ ब्रह्मं नय प्रतो ध्याम ॥ यजमान वा यं प्रद्या त

ह इति ब्रह्मसदनाच्छुष्कं तृणमुभयतः प्रतिष्ठिय निरस्य तो ब्र ला
ति ॥ उदं॰ अनुष्कत्राग ग्रं निधाय । इदमहमर्वावसोः सदसि ५
सीदामि इत्युपविश्य ॥ बृहस्पतिर्ब्रह्मा स यज्ञं पातु स यज्ञ
पतिं स मां पातु ॥ बृहस्पतिर्दैवो ब्रह्माहं मानुषो भूर्भुवः स्व
रों ब्रह्मन्प्रणेष्यामीत्युक्ते ॐ प्रणय यज्ञं देवता वर्द्धय
त्वं नाकस्य पृष्ठे यजमानो अस्तु सप्तऋषीणां सुकृतां य
त्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि अनुज्ञात उत्तरेण
आहवनीयं संप्रति निदधाति कस्त्वेति ॐ कस्त्वा युनक्ति स
त्वा युनक्ति कस्मै त्वा युनक्ति नान्तरेण गच्छेयुः चत्वारोग्नी
न्परिस्तवीर्यं पुरस्तात्प्रथमं । द्विशः पात्राणि संसादयति
यजमानो वा । सर्वाणि च हवींषि । स्फ्य कपालं पात्रीं धान्यं । पवि ॥ २ ॥

री

© Dharmartha Trust J&K. Digitized by eGangotri

नस्म वा युनि ३

१९॥ शम्याकृष्णाजिनं उलूखलमुसलं । दृषदुपलं । पात्री
यान्यं । पवित्रछेदनानि पवित्रे । प्रोक्षणीः संयवनोदकं । स्था
ली । आज्यं चरु । वेदश्च दक्षिणार्थः । उदककरणमन्त्रिः । र
ध्मा । वर्हिः । स्रुवो जुहूः । उपभृद्ध्रुवा । प्राशित्रहरणं । इडा
व दानं । पुरोडाशपात्र्यौ । योक्त्रं पुनरक्तशाखा । पदोपवित्रय
स्त्र यः । होत्रपीठं कुशास्तरणी । इडापात्री षड्वर्त्तं । अतऊर्ध्वंक
टः शूर्पपात्रं । पद्धो कर्मायवर्गे समितृ । गार्हपत्यस्य पश्चात्स्फ्या
पहितायां पात्र्यामोषधकरणं । कर्मणे वामिति स्रुपाग्नि होत्रह
वण्यादाय ॐ कर्मणे वां वेषाय वां । वाचं यच्छति । व्रतपनं
प्रत्युष्टं निष्टप्तमिति वा । पत्युष्टं रक्षः प्रत्युष्टा अरातयः ।
उदकोपस्पर्शनं । गच्छन्सर्वं तदिच्छामिति । ॐ पूराणासिधा

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ उर्वंतरिक्षमन्वेमि। धूरीषारोहणानि पात्रीर्निर्नेजति। ॐ धूरसि
धूर्व धूर्वंतं धूर्वतं योस्मान् धूर्वति तं धूर्वयं वयं धूर्वामः॥ देवाना
मसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमं। अह्रु
तमसि हविर्धानं दृंहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत्॥ विष्णु
स्त्वा क्रमतां। प्रेक्षते। उरुवातायेत्यपहतमिति निरस्यत्य
न्यत्र। आविद्यमाने स्मिन्दोत्र। ॐ अपहतं रक्षः। उदकस्पर्शः।
यच्छंतामित्यामित्यालंभते यच्छंतां पंचा। देवस्यत्वेति गृह्णा
त्याग्नेयं चतुरो मुष्टीन्। ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बा
हुभ्यां पूष्णो हस्ताभ्यां। अग्नये जुष्टं गृह्णामि। वारं चतुर्थं त
ष्णीं एवमग्नीषोमीयं॥ यथादेवतमन्यत्र। ॐ देवस्य त्वा। अ
ग्नीषोमाभ्यां जुष्टं गृह्णामि। उत्तरायत्वेति शेषाग्निमर्शनं॥ ॥३॥

© Dharmartha Trust J&K. Digitized by eGangotri

ऽन्तनायत्वा नारातये स्वरिति प्राङ्‌दीक्षते ईं स्वरभिविख्येषं ।
दृंहन्तामित्यस्यानं ईं दृंहन्तां दुर्याः पृथिव्याम् । गच्छत्येवं ता॰
त्रिक्रामिति ईं उर्वन्तरिक्षमन्वेमि श्रयणस्य पश्चात्सादयति पृथि
व्यास्त्वेति ईं पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थेऽग्ने हव्य
ं रक्षेति कुशौ समावप्रच्छिन्नाग्रावनन्तर्गर्भौ कुशैश्छिनत्ति पवि
त्रस्य इति ईं पवित्रे स्थो वैष्णव्यो ईहविर्ग्रहण्यामपः कृत्वा तान्या
पुनाति सवितुर्व इति ईं सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रे
ण पवित्रेण वसोः सूर्यस्य रश्मिभिः । तास्थाने तयोः । सम्मे
त्य त्वादक्षिणेनो दिंगयाति देविरापई ति ईं देवीरापो अग्रेगुवो अ
ग्रेपुवोऽग्र इमम द्य यज्ञं नयताग्रे यज्ञपतिं सुधातुं यज्ञ
पतिं देवयुवं । युष्मा इंद्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं

© Dharmartha Trust J&K. Digitized by eGangotri

वृत्रस्य यैं प्रोक्षिताऽस्थेति तासां प्रोक्षणं । ॐ प्रोक्षिता स्थाह वि
श्चाग्नये त्वाग्नीषोमाभ्यां त्वेति । यथादेवतं प्रतमन्यत्र । ब्रह्म
न् हविः प्रोक्षिष्यामि । ॐ प्रोक्ष । ॐ अग्नये त्वा जुष्टं प्रोक्षामि ।
ॐ अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि । पात्राणि दैव्यायेति ।
५ ॐ दैव्याय कर्मणे शुंधध्वं देवयज्यायै यद्वोऽशुद्धाः पराजघ्नु
रिदं वस्तच्छुंधामि सन्नमंत्रेणाद्भिः स्तृ लौमा । सर्वाणि प्रो
क्षयेत् । तां च संचरे प्रोक्षणीं निधाय । शर्मासीति कृष्णाजि
नादानं । ॐ शर्मासि । अपेत्य पात्रेभ्योऽवधूनोत्यवधूतमिति ।
ॐ अवधूतं रक्षोऽवधूता अरातयः । उदकोपस्पर्शनं । अत्र त्व
गीव मास्तृणात्यदित्यास्त्वगिति । ॐ अदित्यास्त्वगसि प्रति
त्वादितिर्वेत्तु । सव्यान्यन्येनिदधात्युत्तरवज्जमद्धिरसि ॥८॥

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रवासीवातिवाअत्ति त्वेत्यनयोः॥ ॐ अद्रिरसि वानस्पत्यः
अतित्वादित्यस्त्वग्वेत्तु॥ हविरावपत्यग्नेस्तनूरिति॥ ॐ अग्ने
स्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि॥ वाचं वि
सृजते यजमानश्च॥ हविष्कृतावाह हृद्रावेति मुसलमाद
त्ते॥ ॐ बृहद्ग्रावासि वानस्पत्यः॥ स इदमित्यवदधाति॥ ॐ स इ
दं देवेभ्यो हविः शमीष्व सुशमि शमीष्व॥ हविष्कृदेहीति त्रिरा
ह्वयति॥ ॐ हविष्कृदेहि हविष्कृदेहि हविष्कृदेहि॥ अत्राकपत्याह
त्यव्योदषदुपलेकुक्कुटोसीति त्रिः शम्याद्दिर्दृषदः स
दुपलां॥ ॐ कुक्कुटोसि मधुजिह्व इषमूर्जमावद त्वया वयं
संघातं संघातं जेष्म॥ अत्र नीः॥ धः॥ कं॥ ड नं तू॥ ॐ वर्षवृद्धम

© Dharmartha Trust J&K. Digitized by eGangotri

5

सीति शूर्पमादत्ते। ॐ वर्षवृद्धमसि। प्रति त्येति हविरुद्धपाति।
ॐ प्रति त्वा वर्षवृद्धं वेत्तु। परापूतमिति निष्पुनाति। ॐ परापूतं
रक्षः परापूता अरातयः। उदकोपस्पर्शनं। वायुर्व
इति विविनक्ति। ॐ वायुर्वो विविनक्तु। पुनः कंडनं। तूष्णीं
निःपवपनं। आपाधुर्ध्रुः अपहतमिति तुषान्निरस्यति। ॐ अ
पहतं रक्षः। उदकोपस्पर्शनं। देवो व इति पात्र्यामोप्या
भिमन्त्रयते। ॐ देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्वछि
द्रेण पाणिना। त्रिः फलीकरोति। फलीकृत्य कणान्निदधाति।
पिष्टलोपाधाने युगपत्। तत्र कपालोपधानमन्त्रो ध्रुवः। ध्रुवमसि १२
त्कपवेशमादाय। ॐ धृष्टिरसि। अपाग्न इत्यंगारानंगाराचं
करोति। ॐ अपाग्ने अग्निमामादं जहि निःक्रव्यादं सेध। ॥५॥

© Dharmartha Trust J&K. Digitized by eGangotri

आदेवयजमित्यंगारमाहृत्य ॥ आदेवयजं वहाकपा
लेनावच्छादयति ॥ ध्रुवमसि पृथिवीं दृंह ब्रह्मवनित्वा क्ष
त्रवनिसजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥ सव्यांगु
ल्याग्नेयं गारं निदधात्यग्ने ब्रह्मेति ॥ अग्ने ब्रह्म गृभ्णीष्व ॥
धरुणमिति पश्चात् ॥ धरुणमस्यन्तरिक्षं दृंह ब्रह्मवनित्वा :।
पुरस्ताद्धर्त्रमिति ॥ धर्त्रमसि दिवं दृंह ब्रह्मवनि० विश्वाभ्य
इति दक्षिणतः ॥ विश्वाभ्यस्त्वाशाभ्य उपदधामि ॥ सर्वं वि
न्ज्यद्धदक्षिणत एवमुत्तरतश्चितस्थेति ॥ चितस्थोर्ध्वचि
तः ॥ ४ ॥ एवमेकादशाग्नीषोमीयस्य अर्धिकं दक्षिणतः ॥ न्दसू
णामित्यंगारैरध्यूहति ॥ भृगूणामंगिरसां तपसा तप्यध्वं ॥ र
उपसर्जनीरधिश्रयति ॥ कृष्णाजिनमादत्ते ॥ सर्वं वत्सप्रतिग्रहा

© Dharmartha Trust J&K. Digitized by eGangotri

जिनं। ॐ शर्मासि। ॐ अवधूतं रक्षोऽवधूता अरातयः
उदकोपः। ॐ अदित्या।स्त्वच्यास्तृन्ये तस्मिंदृषदं धिषणा
सीति। ॐ धिषणासि पर्वतीत्र ति प्रति त्वादित्यास्त्वग्वेत्तु पश्चा
छम्यामुपोहत्कदीचीं दिवस्तति। ॐ दिवस्कंभनिरसि द
6 षदुपलां धिषणासीति। धिषणासि पार्वतेयी प्रति त्वाप
र्वती वेत्तु। धान्यमसीति तंडुलानोप्य। धान्यमसि धिनुहि देवा
न्। पिनष्टि प्राणाय त्वेति प्रतिमंत्रं। ॐ प्राणाय त्वा। ॐ उ
दानाय त्वा। एककटके। अर्धपिष्टे कपालोपधानं। ॐ व्यानाय त्वा।
दीर्घामिति कृष्णाजिने प्रोहति। ॐ दीर्घामनुप्रसितिमायुषे धां
देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणि
ना। चक्षुषे त्वेति चित्ते। ॐ चक्षुषे त्वा। पिष्यमाणेषु निर्वपति ॥६॥

© Dharmartha Trust J&K. Digitized by eGangotri

न्योमहीनामित्याज्यं ॐ महीनां पयो ऽसि। निरूप्याज्यं वेदोसी
तियजमानो वेदं करोति ॐ वेदोसि येन त्वं देव वेद देवेभ्यो
वेदोनवस्तेन मह्यं वेदो भूयाः। पान्या ८ काव पवित्रायां
पिष्टान्यावपति देवस्य त्वेति देवस्य त्वा सवितुः प्रसवे
ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां संवपामि। अपणस्य पस्या
उ पवित्रान्तं तवै दिव उपसर्जनीरानयत्यन्यः। पवित्राभ्यां
प्रतिगृह्णाति समापइति ॐ समापओषधीभिः समोषधयो
रसेन। सं रेव ८ पतीर्जगतीभिः पृच्यन्तां ८ सं मधुमतीम
तीर्मधुमतीभिः पृच्यन्तां। संयौति जनयत्यै त्वेति ॐ जनय
त्यै त्वा संयौमि। द्वे रोडाशं बध्नन्। समविजज्यासः ८ हरिष्यन्तां।
न्नात्वजन्तरं दमग्नेरिदमग्नीषोमयोरिति निर्यथा देवतमन्यत्।

© Dharmartha Trust J&K. Digitized by eGangotri

इदमग्नेः॥ ॐ इदमग्नीषोमयो॥ अवदानकरणं॥ इ
षेत्वेत्याद्यमंधिअयत्यन्यः॥ ॐ इषेत्वा॥ घर्मोसीति
पुरोडाशं पुरापत॥ ॐ घर्मोसि विश्वायुः॥ उरुप्रथ
इतिइतिप्रथयतिपाकेवे पालमनतिप्रथः॥ ॐ उरु
प्रथा उरु प्रथस्वोरुते यज्ञपतिः प्रथतां॥ अग्निष्ट
इत्यग्निरस्यश्रातिसरुग्निर्वा॥ ॐ अग्निष्टे त्वचं माहिं
सीत॥ पिष्टलेपापनयनं॥ पात्र्या गुंजिपहालनं॥
पर्यग्नि कुरोत्यंतरित रक्षो तरितो अरातयइति
सहस्र्यं॥ ॐ अंतरित रक्षोंतरिता अरातयः उल्लो
पस्पर्शनं देवेस्त्वेति अपणं॥ देवस्त्वा सविता श्र
पयतु वर्षिष्ठे धिनाकेरामाज्ञे रित्यालज्ज ते॥ ॐ माज्ञेमा संविक्तु॥ ७॥

© Dharmartha Trust J&K. Digitized by eGangotri

व

या:।२।पात्रो ऽन्नतामेकदि तिष्ठ तावन्निवासयति नस्मना
वेदेनो पषिएवा। ॐ अतमेकूर्यज्ञो तमेकूर्यजमानस्य प्रजा
न्स्यात्।२। पात्र्यांगुलि प्रच्छालन मायस्योनिनयत्यनि
तप्य प्रत्यगसं ८ स्यंदमानत्रितायत्वे तिमतिमंत्रो। प्राचे
रवननं प्रत्यंचं निनयन्नी। ॐ त्रितायात्वा। ॐ इदं त्रितयाप्या
यन मम। ॐ द्वितायत्वा। ॐ इदं द्वितायाप्यायन मम। ॐ एकता
यत्वा। ॐ इदमेकतायाप्यायन मम। अन्वाहार्यंदक्षिणाग्ना
वधिश्रयति तस्याधिः श्रपणनं। अत्र वाध्रुतोपायनं। वेदि
मानं। अपरेणाहवनीयं वेदिं करोति। अपरेणाहवनीयं
वेदिखननत्र्यंगुलखाता व्याममात्री पश्चात्परन्नि प्रा
ची मरिमितां वा। प्रथमः। द्वितीयः। तृतीयः। चतुर्थः। इति

प

© Dharmartha Trust J&K. Digitized by eGangotri

8

पश्चात्‌ ॥ मध्ये प्रथमः ॥ द्वि० ॥ तृ० ॥ इतरस्माच्चा ॥ प्रथमः ॥ द्वि० ॥ तृ० ॥
मध्य संगृहीतो ॥ अग्निमथितो ऽसौ ॥ कुशैर्वेदिं परिसमूह
न मग्नीध्रः ॥ विसृचतायोग्नीदुत्तरत उत्करं करोति देवस्यत्वे
तिस्फ्यमादाय सव्ये पाणौ ॥ देवस्यत्वा ॥ आददे अध्वरकृतं देवे इ४
भ्यः ॥ सव्ये कृत्वा दक्षिणेनाल[illegible] जपती इन्द्रस्य बाहुरसि दक्षि
ण इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि
तिग्मतेजा द्विषतो वधः ॥ वेद्यां चलानि दत्वा तृणं उदक[illegible] पृथिव्यै
वर्मासीति ॥ पृथिव्येव र्मासि त्वा पृथिवि देवयजनी तिच्छेरो
त हि ते ज[illegible]रा[illegible] ॥ पृथिव्ये देवयजन्योषध्यास्ते मूलं मा
हिंसिषं ॥ व्रजं गच्छेति पुरीषमुद्धृत्य ॥ व्रजं गच्छ गोष्ठानं वे
नो ॥ वर्षतु ते द्यौ वेदिं प्रोक्ष्य ते वर्षतु ते द्यौः बधान[illegible] ॥८॥

स्फ्यकरे करोति ॥ अथानदेवस्सवितुः परमस्यां पृथिव्या
ः शतेनपाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मामौ
क् ॥ अपारुरमिति द्वितीयं प्रहरति ॥ अररुं पृथिव्यै
देवयजनं दध्यासं । उदकोपस्पर्शनं । व्रजं० वर्षतु० । अथ
त्य नं० । अनिभ्यस्यत्य नीदुक्करमररोदिवमिति ॥ अररो दि
प वं मा मः । उदकोपस्पर्शनं । उपस्त इति तृतीयं । उपस्ते
भ्रां मास्कन् । व्रजं० वर्षतु ते द्यौः । अथानं० । नू [illegible] चतुर्थं ८०
सकृत् । प्रहरणं सकृत् । पुरीषादानं वेदिप्रोक्षणं । उत्करेप
क्षेपश्चात्र एवं परिग्रहं परिगृह्णाति दक्षिणतः पश्चादुत्तरतश्च
स्फ्येन गायत्रेणेति प्रतिमंत्रां ब्रह्मन्नुत्तर एवं परिग्रहं परिग्रही
ष्पा मि । ॐ परिगृह्णामि ॥ गायत्रेण त्वा छंदसा परिगृह्णामि ॥ ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टुभेन त्वा छंदसा परि गृह्णा मि ॥ ॐ जागतेन त्वा छंदसां परि गृ
ह्णा मि ॥ वेद्यां त्रिः कृ ह्निः स्रवेण ॥ ॐ इदं त्रिः ॥ त्वामीं क्ष्रे स्रवाः स्रा
सं मृशाति ॥ अत्र वेदि करणं यथोक्तं ॥ ततो वेदि खननं ॥ उत्त
रं परि गृह्य परि गृह्णाति सुक्ष्मा स्योनेनोर्जस्वतीति प्रति मंत्रं
पूर्ववत् ॥ ॐ ब्रह्मन्नुत्तरं परिग्राहं परिग्रहीष्यामी ॥ ॐ परिगृह्ण
ण ॥ ॐ सुक्ष्मा चासि शिवा चासि ॥ ॐ स्योना चासि सुखदा चा
9 सि ॥ ॐ ऊर्जस्वती चासि पयस्वती च ॥ दक्षिणतः पुरीषोद्धरण
पुरा क्रूरस्योत्सृज्य मार्ष्टि ॥ ॐ पुरा क्रूरस्य विसृपो विरप्शिं
न्नुदादाय पृथिवीं जीवदानुं यामैरयंश्चंद्रमसि स्वधाभि
स्तामु धीरासो अनुदिश्य यजंते ॥ अध्यधि वेदिं प्रोक्षणीर्धा
रयति ॥ अन्योऽध्वर्युर्मुख्यमाह ॥ ॐ प्रोक्षणीरासादयेध्मं बर्हि
रुपसादय स्रुवश्च स्रुचः सं मृड्ढि पत्नीं सन्नह्याज्येनोदेहि वै ॥९॥

© Dharmartha Trust J&K. Digitized by eGangotri

हिवे घांप्रो हूपपास्सादनं ॥ द्विषतोवधइत्ति स्पं
चंप्रहरत्ति ॥ ॐ द्विषतोवधोसि ॥ अपवानिन्यपपा
ली ॥ अपपरेल प्रणीनास्पं । दघात्ति ॥ इद धमा
बर्हिश्च ॥ पूर्वामिध्मं प्रणीताद । हिलेनवाकृत्य
वेदाग्र । निष्पत्तिः ॥ रक्तवेदान्तप्पपूर्वं वत् ॥ ॐ प्र
त्युष्ठरहः प्रत्युष्टा अराजतयः ॥ ॐ इक्कोस्परा
तं ॥ वेदाग्रैरंतरंतः प्राकृसंमार्ष्टि । निरीत्तइ
ति विपर्यस्य बर्हिर्मूलैः प्राङ्क्रम्य ॥ ॐ अनि
वित्तोसिसपत्नहि वाजिनं त्वा वाजे ध्यायैसं
मार्ज्मि ॥ २ ॥ प्रतप्य प्रतप्य प्रयच्छत्ति ॥ ॐ प्रत्यु

© Dharmartha Trust J&K. Digitized by eGangotri

उदा१०॥ आनिहितेत्तिसृच॥ ॐ आनिहीतास्मि० ॥

प्रतिनीत्वा०१२॥ ॐ प्रत्युष्ट०॥ उदा३॥ नूस्तीर्ण

हित्रहरण ७ ॐ तावदानं८ पात्रीञ्च॥ सं

मार्जनान्यपास्यत्ति॥ आहवनीये प्रासनमे

के॥ पत्नी८ सन्नह्यतिप्रत्यग्दाहिएत्तरुपवि

श्यंगार्हपत्यस्य मुं जयोक्तेए त्रिवृत्तापरिहरं

त्यधीवासो दितिस्यैरस्नोत्ति॥ ॐ अदित्यैरास्ना

सि॥ दाहिएं पादमुत्तरे प्रतिमुच्य॥ ॐ घर्मेद्र

हातिविष्णोर्वेष्णोसि॥ नग्नं त्रिकरोत्ति॥ ॐ ॐ

र्जे त्वेत्यात्यमुद्वास्य॥ ॐ ऊर्जे त्वा॥ पत्नीम

© Dharmartha Trust J&K. Digitized by eGangotri

वेद्दय त्सदब्धेन ने ति॥ पत्नाज्यमवे दस्वा॥ अदब्धेन त्वाच
क्षषावपश्या मि राय स्पोषाय सुप्रजास्त्वाय सुवीर्याया ग्नेर्जिह्वा
सि सुहूर्दे वेभ्योधाम्नेधाम्ने मेन्न वयजुषेयजुषावे द्यांकरोत्वपर्व
प्रणीत्यः। स वितु स्त्वत्याज्य मुत्पुनाति॥ सवितुस्त्वा प्रसव उ
त्पुनाम्यछिद्रेण सूर्यस्य रश्मिभिः। प्रोक्षणीष्व पूर्ववत्॥ स्व
सवितुर्वः प्रसव० भिः॥ आज्यमवे क्षते तेजोसी ति यजमानो
वा॥ तेजोसि शुक्रमस्यमृ तमसि वैश्वदे वमसी त्यवेक्षतोन्त
वेणाज्यग्रहणं चतुर्जुह्वां धाम नामेति सप्त मन्त्रः। धाम नामसि
प्रियंदे वानामनाधृष्टं देवयजनमसि प्रथमः। द्वितीयः। तृती
यः। चतुर्थः। अष्टाउपभृत्यष्टौपोन्तुपाजा॥ धामनामसि०।
सप्तकृत्वा स्त्रुचि प्रथमः। द्वि०। तृ०। च०। पं०। पंचमः। षष्ठः। सप्तमः।
अष्टमः। ध्रुवायांचतुर्वत्॥ धामनमसि०। प्रथमः। द्वि०। तृ०।

© Dharmartha Trust J&K. Digitized by eGangotri

च०।स्याज्यपम्नरणां इध्मं प्रोक्षति विस्रस्य वेदिं च बर्हिः प्रतिग्
ह्यं वेद्यां न्यस्य पुरस्ताद्ग्रंथिं न्यक्षोयीति प्रतिमंत्रं।ॐ ब्रह्मन्निध्मं
प्रोक्षिष्यामि।ॐ प्रोक्ष।ॐ कृष्णोस्याखरेष्ठो ग्नये त्वा जुष्टं प्रोक्षामि
।ॐ वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि।ॐ ब्रह्मन्बर्हिः प्रोक्षिष्यामि
।ॐ प्रोक्ष।ॐ बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि।शेषं मूलेष्व प
सिंचत्यदित्यै व्युंदनमिति।ॐ अदित्यै व्युंदनमसि।पवित्रे निधा
य प्रणीतास्नुवा बर्हिर्विस्रस्य पुरस्तात्प्रस्तरग्रहणं।विष्णोरिति
।ॐ विष्णोः स्तुपोसि।तं ब्रह्मणे प्रदायान्तरेण विस्रस्य
दक्षिणस्यां वेदिश्रोणौ निधायान्यैरवशिष्टैर्बर्हिस्तथा
करणं।आपंक्तेः स्तरणं निरस्य तु वेदिं स्तृणात्यूर्णम्र
दसमिति त्रिवृतं।ॐ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां दे
वेभ्यः।३।बहुलमधरमूलं पश्चादपवर्गं समित्प्रस्तरादा।।११।।

© Dharmartha Trust J&K. Digitized by eGangotri

नोऽइध्मास्समिधमादायाहवनीये कल्पेयन्तु पशुपरिप्रस्तारं
धारयन्त्वाउ ज्जुकेउ द्रु इत्यनुयाजाश्चेत्पापरेथीन्यरिदधात्या
ग्नेकहद्वीयान्वाङ्क्मात्रान्पालाशवैकेतकार्श्मर्यवैल्वान्
वांजाश्चेरवाजानेउत्तरान्प्रादिशोदुंवरान्वामध्यमदाक्षिणो
त्तरानांधर्वइति प्रतिमंत्रांउँ गंधर्वस्त्वाविश्वावसुःपरिद
धातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ई
डितः उँ इंद्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमान
स्य० उँ मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा
विश्वस्य० प्रथमं परिधिः समिधोपस्पृश्य वीतिहोत्रं
मित्यादिधानि ओ स्यायाउ वीतिहोत्रं त्वा कवे द्युमन्तं समि
धीमहि अग्ने बृहन्तमध्वरे अनुपस्पृश्य द्वितीयां समि
दसीति उँ समिदसि वेदिमध्ये उपविश्य सर्पस्त्वेति जपन्त्या

हवनीयमीक्षमाणः ॐ सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभि
शस्त्यै। आहृत्य वेदिं बर्हिषस्तृणे तिरश्ची निदधाति सवितु
रिति। ॐ सवितुर्बाहू स्थः। तयोः प्रस्तरं स्तृणात्यूर्णम्रदसमि
ति। ॐ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यः। अभिनि
दधात्या त्वा वसव इति। आ त्वा वसवो रुद्रा आदित्याः सदं
तु। आसव्याक्षन्न्ये जुहूं प्रतिगृह्य निदधाति घृताचीति। ॐ घृताच्य
सि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रियं सद आसीद। ॐ ध्रु
वमितरे उत्तराभ्यां प्रतिमंत्रं। वेदोपयामेन। ॐ घृताच्यसि उ
पभृन्नाम्ना सेदं प्रियेण धाम्ना प्रियं सद आसीद। ॐ घृता
च्यसि ध्रुवा नाम्ना सेदं प्रियेण धाम्ना प्रियं सद आसीद। बर्
हिष्युपभृतं ध्रुवां चाज्यं अवकृष्टे न पूर्वां वेदमाज्यस्थालीः स्रु
वं चादाय। गार्हपत्यमेत्य तु पुरोडाशाविभस्मीकरणं। पुरोडाशपात्रौ ॥१२॥

स © Dharmartha Trust J&K. Digitized by eGangotri

यस्तो॰ हिन्न त्वा नीथो मोछ्यं॰ ॥ अग्निं न त्रि कपालानि सं॰ स्थापयती ॥

स्थापनं पशुम् अनुपस्तारः । तत्र स्याद्विचारः उं धामन्नाद्य तानां उ
त्तरे वेद्याम् उद्वासितानां उद्दिष्टतः । कपालसंख्याप्रमाणेदानीं उं यस्ते प्रा
णः पशुषु प्रविष्टो देवानां विष्टाम् अनुयो वितस्थौ । आत्मन्वां सोम
घृतवान्हि तं त्वाग्निं गच्छ स्वर्यजमानाय विंदा यथा देवतमन्यता ॥
सस्वाहा येनुं ब्रूहि । ततो होता उं ब्रह्मन्सामिनिरनुवक्ष्यामि । त
तो ब्रह्मा उं प्रजापतेनुब्रूहि यज्ञदेवता॰ उं अनुब्रूहि उं
शान्त्यो चावखायतेपाद्यान्त्यां वा उं उद्वासयामि उं प्रथमम् उद्वासयामि ।
उं द्वितीय॰ । उं तृतीय॰ । चतुर्थम् अनु॰ । उं पंचमः । उं षष्टमुद्वा॰ । उं सप्तमम् उं॰ ।
उं अष्टम॰ । उं प्रथमम् उद्वासयामि । उं द्वि॰ । उं तृ॰ । उं च॰ । उं पं॰ । उं ष॰ ।
उं स॰ । उं अ॰ । उं नवमम् उद्वासयामि उं दशमम् उ॰ । एकादशम् उद्वा॰ ।
प्रियेण धाम्नेति हवींषि वेद्यां कृत्वा उं प्रियेण धाम्ना प्रियं
सदा आसीद । इति वेदोपग्रहेणाज्यस्थालीं । ततः पुरोडाशौ

© Dharmartha Trust J&K. Digitized by eGangotri

वज्रोपयद्देणा उं प्रियेण धाम्ना प्रियं सद आसीदा ध्रुवा अ

सदन्निति सर्वाण्यालभ्येतां ध्रुवा अ सदं नृतस्य योनौ सुकृ

तस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं मित्यासादन

क्रमेणाभिमृशेत् । ततः पाहि मां यज्ञन्यं मित्यात्मानं हृदयमुपस्पृ

शेत् उदकोपस्पर्शनं । ततो वृष्टिरसि पाप्मानं मे वृश्च विद्यासि वि

द्य मे पाप्मानमित्याचमनं कुर्यात् । ततो उत्तरेणान्वाहार्यपचनं य

जमानस्य दक्षिणतः कृत्वा स्वसंचरेण गत्वा अग्ने व्रतपते व्रतं चरि

13 ष्यामि तच्छकेयं तन्मे राध्यतामिदमहमनृतात्सत्यमुपैमि स्वाहे

त्याहवनीये समिधमाधाय वाचं यच्छति । ततो ध्वर्युः होतृषदनं क

त्वा परेण वेदिं श्रोणिं वा उत्तरेण होतुरेति उं एहि । ततः इध्मा

त् समिधमादाय उं अग्नये समिध्यमानायानुब्रूहि । ततो हो

ता उं ब्रह्मन् सामिधेनीरनुवक्ष्यामि । ततो ब्रह्मा उं प्रजापतेर्नु ॥१३॥

© Dharmartha Trust J&K. Digitized by eGangotri

ब्रूऽहि यज्ञदेवताः ॐ अनुब्रूऽहि ॐ यं तन्त्वनि वमेनुब्रूहि तिरो
तारं द्रेष्यति सामिधेनीष्वनुप्रव्रमानास्विदमहं पंचदशेनवज्रेण
भ्रातृव्यमववाधइति पादांगुष्ठाभ्यां वेदिपिडयेत् प्रतिप्रणे ५
वमाधानं स्तनित्नूइति प्रागतः सर्वमिध्ममेकवज
मनुपाजाभ्युत् ॥ अपनुवचमांतेवेदेनाहवनीयं त्रि
रूपवांवाज्य ॥ स्रुवेण पूर्वमाघारमाधार्याहि ॥ प्र
जापतिं मनसाध्यात्वा होयेः ॥ ॐ इदं प्रजापतये न
मम ॥ त्यागाः सर्वे यजमानास्यो ॥ ॐ अग्निमग्नीत्स
ह्रि ततोग्नीत् ॥ इध्मसन्नहनैरनुपरिधिं संमा
र्ष्टि ने वाजजितिति त्रिः परिक्रामयेत् ॥ अग्ने वाज
जिद्वाजं त्वा सरिष्यन्तं वाजजितं सं मार्ज्मि

© Dharmartha Trust J&K. Digitized by eGangotri

मन्त्रेणादि तूष्णीमेवं सर्वत्र शन्निस्तूष्णीमुपरि ततो ध्य
र्घु: अपरमाहवनीयादं जलि करोति नमो देवेभ्य: स्वाहा पि
तृ ॐ स्वधा पितृभ्य: इति । ॐ नमो देवेभ्य: ॐ स्वधा पितृभ्य: ।
दक्षिण तत्तानेनाप सपस्पृश्य । मुपमेम इति जुहूपन्न
तावादायोत्तरां जुहूं कृत्वा ॐ मुपमेमेत्तया मम स्कें नम
घदेवेभ्य आज्यं संचिया संदाक्षिणातिक्रामत संक्षिणा विष्ण
वि तिर्ॐ अक्षिणा विष्णोमात्वावक्रमिरवंपरिधीन परेण संचरो
ष्यत: सव्येनेतोदक्षिणामुत: । वसुमतीमित्यवस्थाय ॐ व
सुमतीमग्नेते छायामुपस्थेषं विष्णोस्थानमसि इत इन्द्र
इति जतो त्युच्चरा घार ॐ इन्द्रो वीर्यमकृणोत् द्धोर्ध्व स्वा
स्थात् अग्ने वैर्जित्रं वेद त्यमना त्वां द्यावापृथिवी वत्वा व
द्यावापृथिवी स्विष्टकृते देवेभ्य इन्द्र आज्येन हविषा स्वा ॥३०॥

णाॐ इदमिंद्रायन मम। आस्रं स्पर्शयित्सु चावेत्यजु हू क्रा वा
ः सम नक्ति सं ज्योतिषे ति ॐ संज्योतिषा ज्योतिः। निधाय स्नु
चौ इतरां वादोपयद्रेणा इध्म संनहनान्यादाय। होत्र वरणं॥
ॐ ॐ ३ आ ३ वय ॐ अस्तु श्रौ ३ षट् इत्यग्नीत्। ॐ अग्निर्देवो दैव्यो
हो तारो देवान्यक्षद् विद्वान् चिकित्वान् मनुष्वद् भरतवत्। अमुव
दमुवदमुनादिति यजमानार्षेयाण्याह। ब्रह्मण्वदा च वक्षद्
ब्राह्मणा अस्य यज्ञस्य प्राविता रः। अमुक शर्मा होता मनुष्यः॥
सं मृष्टा उपविशतः। घृतवतीमित्युक्ते स्रुचावादाय। आ तिक्र
म्या ऽभ्याश्राव्याह समिधो यजेति पंच प्रयाजान्। ॐ ॐ ३ श्रावय। आ
ॐ अस्तु श्रौ ३ षट्। ॐ समिधो यज। होता वौ ३ षट् इत्युक्ते सर्व
त्र जुहोति। ॐ इदं समिद्भ्यो न मम। ॐ एकोमम एका तस्य योऽस्मान् द्वे
ष्टि यं च वयं द्विष्मः। ॐ त्रिषि निनान्त्यां सं र तियजमानस्य। ॐ ॐ
भूर्भुवः स्वः। ये ३ यजाम हे समिधः समिधो ऽग्न आज्यस्य व्यन्तु वौ ३ षट्। २
ॐ तनूनपाद् ॐ इडः। ॐ तनूः स्वः॥

© Dharmartha Trust J&K. Digitized by eGangotri

उत्रविषयॐ अस्तु उत्रौ षट्ॐ यज्ञॐ इदं तन्न न पानो नरावां स्याजि
नां ॐ इदं नराणां स्यायन मम ॐ द्यौ मम ॥ द्वे तस्य यो स्मांद्वे ष्टि यंचव
यं द्विष्मः ॐ अर्पाचित्ति मां न न्वया सं ॐ उत्रा उवय ॐ अस्तु औ उष
ट् ॐ यज्ञ ॐ इदमिउन्यो न मम ॐ न्वयो न मतिस्व सा स्य यो स्मा ॥
ॐ यशश्चित्त्वपासं उपन्न तो जुका मान यत्य न व न्न शंस्य उर्ध्वं ॐ उ
14 त्रा उवया ॐ ॥ ॐ यज्ञा ॥ ॐ इदं वर्चेन मम ॐ चत्वारो मम ॥ चत त्स्मा
स्य यो ॥ ॐ ब्रह्म वर्चासि न्वया सं ॐ उत्रा उवय ॐ अं ॥ ॐ यजा ॐ इ
दम न्नयेसोमाया न्नये ग्नीषोमा भ्या मग्नीषोमाभ्यां देवेभ्य आज्य
पेभ्यो न मम ॐ पंच्य मम न तस्य किंच न्वयो ॥ ॐ अन्नादो न्वया सं ॥
ए त्य जुह्वा न्निधार णं ॥ ध्रुवायाः ॥ हविषः उपन्न तस्य ॥ आज्य भागा
भ्यां चरत्याग्नेयेन सौम्येन च उत्तर वत्तरः स वषट्कारा स्तु ॐ अ
ग्नयेन ब्रूहि ॥ अनुब्रूहीत्युक्त्वा नापव्याहरेद्धो ताव्रश्रावणादा ॥१४॥

© Dharmartha Trust J&K. Digitized by eGangotri

नाविते श्रीदासत्याश्रावणान्तात्सत्याश्राविते अयुराजेह णा श्रौषाषोता
वषट्कारान्ताः स्रुवायाः प्रथमः। अग्नि धायावदायावदाय स्रुवाम
त्तियोरयति। ॐ आप्यायतां स्रुवाह विषा हृतेनेयजंयजत्रप्रतिदे
वयज्यः। सूर्यायाऊधो अदित्याउपस्थउरुधारापृथिवीयज्ञे
अस्मिन्। द्वितीयः ॐ आप्या। तृतीयः। ॐ आप्या। चतुर्थः ॐ आ
प्या। अस्मिन्। अतिमणो ॐ आ३ वया ॐ अस्तु श्रौ३ षट्। अग्नि
यज ॐ इमम् मये नममम ॐ सोमायानुब्रूहि। सर्ववदाज्यमयड णा
दि ॐ आ३ वया ॐ अ। ॐ सोमं यज ॐ इदं सोमाय नममम। इत्यावि ह
र्भावा ॐ अग्नये नुब्रूहि। स्रुवाया। प्रथमः। ॐ आप्याय। सप्ता
न्तरस्वर्वाञ्च वदानयड णो। पृतावदानेनाग्रस्तुपस्तारः। ॐ आ
प्या। अस्मिन्। हूतानां त्वंगः। अतिक्रम्य ॐ ॐ ३ श्रौ ३ वय ॐ अ। ॐ
अग्निं यज ॐ इदम् अग्नये मुरोजराव्वंतरेणाग्नी षोमाउपांशु था

© Dharmartha Trust J&K. Digitized by eGangotri

15

ज्यस्य विष्णु र्वामावास्यायां ॥ ॐ पांसु ॥ अग्नीषोमाभ्यां ॥ अथोच्छेः ॥
अनुब्रूहि ॥ ध्रुवायः ॥ प्रथमः ॥ ॐ आप्या० ॥ स्मिन् ॥ ॐ ॐ श्रावय ॥ ॐ अ० ॥ पांसु ॥ ॐ अग्नीषोमो ॥ उच्छेः ॥ यजः ॥ ॐ इदम ग्नीषोमाभ्यां
नममा ए स्य ॥ ॐ अग्नीषोमाभ्यां मनुब्रूहि ॥ ध्रुवायाः ॥ प्रथमः ॥ ॐ आ
प्यास्मिन् ॥ मध्याव र्वा० ॥ मस्तु परस्तार ॥ ॐ आप्या० ॥ स्मिन् ॥ ॐ
श्रावय ॥ ॐ अ० ॥ अग्नीषोमोयजा ॥ ॐ इदमग्नीषोभ्यां नममाः ॥ अग्ने
वायैः ॥ विष्णुद्ध्रः मः ॥ स जोक तां वोक्षाये ति मं त्रार्थं मनमस्ताध्यायेत् ॥
यत्कामस्यात्तं कामं वाध्यायेत् ॥ अनु पदस्यमन्ताद्यमापवानीत्या
काशं वाध्याये त्समुद्रं वाध्यायेत् ॥ यावद्ध विरुत्तरार्द्धास्विष्टकृतस्मा
तएव होमोनाज्यादेशेषात् ॥ अग्नः ॥ स्विष्टमाकृतिस्ति ॥ ॐ अ
ग्नयेस्विष्टकृतेनुब्रूहि ॥ ध्रुवायाः ॥ प्रथमः ॥ ॐ आप्या० ॥ स्मिन् ॥
उत्तरार्द्धादवदानं ॥ स्विष्टकृतो द्विश्चापिधारणं ध्रुवायाः ॥ तृतीयः ॥
ॐ आप्या० ॥ स्मिन् ॥ चतुर्थः ॥ ॐ आप्याय० ॥ स्मिन् ॥ नक्तान्यगः ॥ ॥१५॥

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ ॐ ३ श्रा३ वय। ॐ अस्तु श्रौ३षट्। अग्नि०। स्विष्टकृतं वज। ॐ इ
ह्मग्नये स्विष्टकृते तेन ममा। उदकोपः। निधाय स्त्रुचौ। संचरन्नुदा
प्राशित्रमवद्यति यवमात्रं पिप्पलमात्रं वा। अन्यतरतस्त्राज्यमु
नयतो वा। अध्वर्युसंचरेण ब्रह्मणे प्रदाय पूर्वेलोके। ततो ब्रह्मा॥
मित्रस्य त्वा चक्षुषा प्रतीक्षे इति प्राशित्रं प्रतीक्ष्य देवस्य त्वा०
न्यां प्रतिगृह्णामि इति प्रतिगृह्य। ॐ पृथिव्यास्त्वा नाभौ सादया
म्यदित्या उपस्थे॥ प्राग्दंडच्छेदि लौकिकपात्र उपाक निहितकयांगुष्ठेन
च प्राशित्रं गृहीत्वा। ॐ अग्नेष्ट्वास्येन प्राश्नामि इति प्राश्याचंस्वा
दन्ताशांतिरसीत्याचम्य। ॐ प्राणपा असि प्राणं पाहि नासिके। अं
चा। ॐ चक्षुष्पा असि चक्षुर्मे पाहि। चक्षुषी। ॐ श्रोत्रपा असि श्रोत्रं
मे पाहि। श्रोत्रे। इन्द्रस्य त्वा जठरे सादयामि। नाभिं॥ अध्वर्युरप उ
पस्पृश्य इडां पंचावत्तां दक्षिणतो मध्यात् द्व्यावद्य हविः स्विष्ट ॥१६॥

© Dharmartha Trust J&K. Digitized by eGangotri

त्ट्टदाज्यं षडवत्तं ब्रह्मणगच्छाय यजमानन्नागेयत्र्वर्वाह्नोहीर्घं प्राशी
र्पपुरस्ताद्धवायाः करोति । इ ७ । ८ होत्रे प्रदाय । ॐ विस्तृ जं दद्वि
णाति का मन्ति । इ ७ । ९ तिगृह्य । होत्नुरं गुणि पर्वशिञ्च न क्रि । ॐ
वो तरे ७ मा दधाति पूर्ववत् । इ ७ । १० सर्वे न्वारन्ते । इ ७ प हते प्रु
16 च्यमाने ऽग्ना रने यं वर्हिषदं करोति तं च उ ७ ान्त्वा । अंबुध्न पि
न्वस्वा पुमे धुक्ष्व प्रजां मे धुक्ष्व पशून्मे धुक्ष्वा ब्रह्म मे धुक्ष्व दे
वत्रं मे धुक्ष्व विशो मे धुक्ष्व योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य
प्रजया पशुभिरप्यायस्व । ततो यजमानः उपकृते यावाद्यथि
वी इत्युच्यमाच्यमानोऽ ॐ भोश्वेरवद्भं दधात । ॐ शासानो मयीद
मिं उ ७ उ ७ यं दधात्वस्मान् सायोमघवानः सचेतो । ॐ अस्माकं स
न्त्वा शिषः सत्यानः संत्वाशिषा इति जपेत् । ॐ ध्रुवेणा वर्हिषि
पुरुतेत्रु रोडाशं । बध्ना पिन्वस्व प्राणं मे पाहि प्रजां मे पाहि पन ॥१६॥

© Dharmartha Trust J&K. Digitized by eGangotri

पा

दमापश्च वइ०ग्रहणिमार्जनं कुर्यात् ॐ यजमानस्य आलापनोतं।
त्रि इत्र स्तरे ते करोति। अत्रयाब्रह्मा आश्नाति। भागमस्मै परिहरति।
ब्रह्मभागः। ततोध्वर्युर्ब्रह्मभागमाहवनीयं स्रुवेण परिहृत्य
ब्रह्मणे समर्पयति। यजमानभागं चाग्नीषिते। ततोध्वर्युर्यजमा
नभागमपरेण गार्हपत्यं परिहृत्य यजमानाय समर्पयति। अन्वाहा
र्यमभिघार्य उद्वास्य अंतरा ब्रह्म यजमानौ हृत्वा वेद्यां निधाय
ॐ उम् नतौ प्रजापतेर्भागोस्यूर्जस्वान् पयस्वानक्षितिरसि मामे
देखा अमुत्रा अमुष्मिं लोक इह च त्वन्वाहार्यमभिमृश्य। अ
स्याः पौर्णमासेष्टेर्दर्शेष्टेर्वा समृद्ध्यर्थं। अन्वाहार्यं दक्षिणां ब्र
ह्मणे होत्रे चाध्वर्यवे आग्नीध्रे च समविभागेनाहं संप्रददे। ब्रह्म
न्यस्तो भागः स प्रतिगृह्यतां ब्राह्मणाः अयं ॐ दन्नं प्रतिगृह्णी
तेति ब्रूयात् तापत्यापि मयापि दत्तेति ब्रूयात् ॐ को दात् कस्मा

© Dharmartha Trust J&K. Digitized by eGangotri

आ दा का मो दा कामाया दा कामो दा ता कामः प्रतिगृही
ता कामैतत्ते ॐ ओं स्वाद दातु द्द धि वी त्वा प्रतिगृह्णा उ ईति म
न्त्रं पाप्रतिष्ठन्ते न्त्रः ततोऽपु ः मा दक्षिणा उ दद्या स्वपतिः ॥ विष्णु ।
समस्त्योऽमुके समिधमादायाह ॐ ब्रह्मन्प्रस्त्यास्यामि ॐ
समिधायाग्निम् मि समहि ततो ब्रह्मा ॐ देव सवितरेतन्ते
यज्ञं प्राहु ई ह स्यतये ब्रह्मणे । तेन यज्ञम तेन यज्ञपतिं तेन मा
म व देवेन स विश्वा ॰ प्रसूतः ॐ प्रतिष्ठा सं मा हिं सर्ववदपरि
का म ॰ सच्च सच्च स्याप्य वा ॰ समिति ॐ अग्ने वाज जिद्वा
जं त्वा स सवा ॰ सं वा जिमें ब्रह्मानुज्ञा तानुयाजे स्विष्टनि मा
धारत्योप न्त न ॰ समानीत्यातिक्रम्याभ्याद दृवान्यजे
ति ॐ उ श्वा उ वयाऽत्सुस्तु श्रौ उ ष्ठ ह्रा ॐ देवान्यजा ॐ इदं देवा
य ब्र हिं षेनममा ॐ ॐ उ श्वा उ वया ॐ अस्तु श्रौ उ षट् ॐ देवान्यज ॥१९७॥

© Dharmartha Trust J&K. Digitized by eGangotri

न्मेपाहि। ब्रह्मन्मेधुक्ष्व तत्रं मेधुक्ष्व दिशं ज्ञे निरसि दिशोक त्वं
तां कल्पं तां मे दिशं श्रद्धास्तु ज्ञे तास्तु राध्यासमिति ॥ जलं निनयस्य इदं ब्र
ह्मणः इदं होतुः इदं मध्वर्योः इदमाग्नीध्रस्येति ताति दिक्ष्याः ॥ अप
सव्यं कृत्वा दक्षिणा निमुखो भूत्वाऽत्रपितरो मादयध्वं यथाभा
गं पितरः ॥ आवृषायध्वमिति तान निमनयस्य सव्यं कृत्वाऽपउपस्पृश्य
भागान्पात्रं निधायाऽपसव्यं कृत्वाऽमीमदंत पितरो य
थाभागमवीवृषत तेति निमनयस्य सव्यं कृत्वाऽपउपस्पृश्य इदं ब्रह्म
णो इदं होत्रो इदमध्वर्यवे इदमग्नीध्रे इत्यत्विग्भ्यो भागानंदद्यात्
अत्र कृतो ऽइज्येपकानानंतरमेव ॥ अथ यदध्वर्युर्बर्हिषदं करो
ति ततोंतर वेदि सपवित्रस्या ० निरुद्धि मेधातिथिरापोनुह्य
न्ते तेभ्योरापोनुह्य जंत्य तोस्नाधत् ॥ इदमापः प्रवहत व ० समिधा
रति मार्जनं कृत्वा पवित्रे उपहृतां प्राश्नंतिमुत्वा यजमानस्य ॥ तत्रादा
इडाभक्षणं ॥ ३

© Dharmartha Trust J&K. Digitized by eGangotri

वग्नीधश्चतुर्धाकरणं भागप्राशनं तु इडाचम्य ततः षडवत्तं प्राश्ना

त्युपहूता पृथिवी मातेत्युपहूता पृथिवी मातोप मां पृथिवी

माता ह्वयतामग्निराग्नीध्रात्स्वाहा । आचम्य द्वितीयभागप्रा

17 शनं उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतां । ततइडात्रदनः ।

अन्येषां भागप्राशनं पूर्वकमिडाप्राशनं । पवित्रयोर्मार्जयन्ते

परेणवेदिं । सुमित्रियानइति । ब्रह्मा इदमापः प्रवहतयत्किं

चिदुरितं मयि यद्वाहमभिदुद्रोह यद्वाशेपउतानृतं । आपो

माघोन्वन्यारिषं रसेन समगस्महि । पयस्वानग्न आगहि तं मा

संसृज वर्चसा । सं माग्ने वर्चसा सृज सं प्रजया समायुषा । विद्यु

र्मे अस्य देवा इन्द्रो विद्यात्सह ऋषिभिः । होता इदमापः प्रवह० ।

र्दुः सुमित्रियानआपओषधयः संतु । अध्वर्युराग्नीध्रायजमानश्च ॥१३॥

© Dharmartha Trust J&K. Digitized by eGangotri

।इदं देवाय नराशंसाय। इदं देवायाग्नये स्विष्टकृते न मम। प्रती
चो जुहोति॥ चतुर्थी॰ समानीय प्राचीमुत्तरतः आसीनो जुहु
यात्॥ॐ देवेभ्यः स्वाहा॥ॐ इदं देवेभ्यो न मम। एवं जुहूपभृन्ते तो
व्यूहति। अग्नेरग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रस
वेन प्रोहामीति दक्षिणेनोत्तानेन पाणिना जुहूं प्राचीं प्रेरयति
। ततो ग्निषोमौ तमपनुदन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्ये
नं प्रसवेनापोहामीति स्रुक्केन सव्येन पाणिनाऽप्रतीचीमुप
तेप्रेरयति। अमावास्यायां अग्नेर्विष्णोरिंद्राग्न्योरुज्जितिं। अ
ग्निर्विष्णू रिंद्राग्नी तमपनुदन्तु। ततो ध्वर्युः स्रुचावस्तु व्याप्रत्यासा
दयति। वसुभ्य इति प्रतिमंत्रं ॐ वसुभ्यस्त्वा॥ॐ रुद्रेभ्यस्त्वा॥ॐ आ
दित्येभ्यस्त्वा। ततो जुहूं प्रस्तराद् उत्तरतः सादयति प्रस्तरे। प्र

© Dharmartha Trust J&K. Digitized by eGangotri

थमं परिधिं गृहीत्वा श्राव्या हा ३ ॐ ३ श्रा ३ वषट् ॐ अ॰ षट् । ॐ इषिता दैव्या
होतारो भद्र वाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि । सं
जानाथामिति प्रस्तरादानं ॐ संजानाथां द्यावापृथिवी मित्रावरुणौ
त्वा वृष्ट्यावताम् । सपवित्रं प्रस्तरमादाय । विधृती स्थाने कृत्वा अग्न
येनं व्यंतु वय इति । अग्रं जुह्वामनुपत्र मध्यं मूलमित्रस्यां ॐ
व्यंतु वयो रूपं रिहाणाः । ३ । मरुतामिति नीचैर्हत्वा ॐ मरुतां पृषती
गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह । ततः प्रस्त
रादेकं तृणं पृथगादाय सूक्तवाकांते जुहूप्रस्तरे प्रागग्रमुद
गग्रं वा जुहुयात् ॐ इदमग्नये स्तोमाय अग्नये अग्नीषोमाभ्या
मग्नीषोमाभ्यां देवेभ्यः आज्यपेभ्यो अग्नये होत्राय न मम । ततो
तं प्रस्तरमध्वर्युरंगुलीभिरयोजेरयेत् । यजमानः जोषितं
सूक्तवाकांते ध्वर्युहस्तेनैव यजमानभागमाहवनीये जुहुयात् ॥१८॥

© Dharmartha Trust J&K. Digitized by eGangotri

त्वा। ॐ अस्त्वदस्मिमदसि त्वमेत्वन्मम त्वं योनिस्तवयोनिरास्मिमे
मैवसंदिविदेवेषु ध्यिपुत्रः पित्र्येलोकेऽजातवेदः स्वाहा। इदं जा
तवेजातवेदसे न मम। इत्यामादायानुप्रहरति। उत्तेनाररति। च
स्त्कवाकां ते अग्नीदाहानुप्रहरेति। ॐ अनुप्रहर प्रास्यत्र एव
ष्णाइत्यामानमान्त्रेतो। ॐ चक्षुष्या अग्ने सि चक्षुर्मे पाहि। उ
दकोपः। ॐ संवदस्व। ॐ आगानग्नीदित्यध्वर्युः। ॐ अगन्नित्यग्नीत्। द
ॐ श्रौषट् वयेत्यध्वर्युः। ॐ श्रौषट् इत्यग्नीत्। ततोऽध्वर्युः। ॐ स्वगा
दैव्याहोतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहि एताषा० संवदस्वा
गं श्रोषडित्यग्नीद्धोषमित्तरो व्यत्यासकृत्तः। परिधीननुप्रहर
ति यं परिधिमिति प्रथमं। ॐ यं परिधिं पर्यधत्था अग्ने देवपणिभिर्गु य
ह्यमानः। तं तते मनुजोषं भराम्येष नेत्वदपचेतयातै इत तभ
कौ च यूरोप तम्नेप्रियमिति। ॐ अग्नेः प्रियं पाथोऽपीतं खुश्री

ग

© Dharmartha Trust J&K. Digitized by eGangotri

चौत्रगृह्णाति। सं॰स्रवभागा इति। सं॰स्रवांजुहोति। ३ सं॰स्र
वभागास्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः। इमां वाचमभि
विश्वे गृणन्त आसद्यास्मिन्बर्हिषि मादयध्वं॰ स्वाहा वा ट्
३ इदं विश्वेभ्यो देवेभ्यो नमः। धृताचीरिति धुरि निदधात्यनसि
चेद्धरणं॰ स्यपात्र्यां चेत्। ३ घृताचीस्थो धुर्यौ पातं॰ सुम्ने मा
धत्तं। यज्ञ नमश्च त इति वेदिमालभते। ३ यज्ञ नमश्च त उप च य
ज्ञस्य शिवे संतिष्ठस्व स्विष्टे मे संतिष्ठस्वा इति यजमानो वेदिम
न्नेता स्फ्योपयहेण। वेदं॰ होता। स्रुक्स्रुवमध्वर्युः। राज्यस्था
लीमग्नीदादाय पत्नीसंयाजेभ्यो गार्हपत्यं गच्छन्ति। ३ अध्वर्युः स्व
दक्षिणेन गार्हपत्यमेत्य पूर्वेण परेण तरेण पत्नीमेकेषां ३ उपवि
श्य दक्षिणा जान्वाच्य एवं॰ सर्वत्रोपविष्टो होमेष्व पां॰ सुचरंति। च
रणशब्दे यः सर्वा देवता न्यन्यजान्ति सोमं त्वष्टारं देवानां पत्नीर ॥१९॥

© Dharmartha Trust J&K. Digitized by eGangotri

इति चातिष्ठंसामिधोन्याधाया जुहांसत्तगृहीतमाज्यं गृहीत्वा
ॐ अग्नये संवेशपतये स्वाहा ॐ इदमग्नये संवेशपतये न मम ॐ सरस्व
त्यै यशोभगिन्यै न मम। पिष्टलेपं जुहोति। ततो जुहूं स्रुवेण गृही
तमाज्यं गृहीत्वा उत्तरवलेमुसलेयज्ञशूर्पे प्राशित्वा हेषहषदि
य त्वक्पाले उत्करेषो विरूपाक्षः संजुहोमि सव्याः संजयजमानस्य
कामाः स्वाहा ॐ इदं विश्वेभ्यो देवेभ्यो न मम। पत्नी वेदं प्रमुंचति
वेदोसीति ॐ वेदोसि ०न्त्रयाः योक्रं च ॐ प्रत्वा मुंचामि वरुणस्य
स्य पाशाद्येन पाबध्नात्सविता सुशेव। ऋतस्य योनौ सुकृत
स्य लोके रिष्टां मा सह पत्या दधाम्युत्तरणात्य वेदे ॥

इष्टगनिपोथी प०२९

श्लो०
३००

© Dharmartha Trust J&K. Digitized by eGangotri